# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा -आचार्यप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ६ | |
| विषयः - स्वामिनारायणवेदान्तः ( J ) | (C.C.- 1.1.2. New ) | गुणाः - ७० |
| दिनाङ्कः - १५/१०/२०१९ | सन्दर्भग्रन्थः हरिगीता-३२-३४ | समयः -११.३० तः ०२.३० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम्। (१०)**

(१) जितकामा जितक्रोधा जितलोभाश्च निर्मदाः ।

अहन्ताममताहीनाः स्वधर्मदृढवर्तनाः ॥ इति हेतुटीकानुगुणं सान्वयं व्याख्यात।

(२) श्रीकृष्णो भगवान् साक्षाद्यो विष्णुः पुरुषोत्तमः ।

स एव सर्वभावेन सेवनीयो मुमुक्षुभिः ॥ इति श्लोकं सान्वयं प्रतिपादयत।

(३) मायां के तरन्ति ?कथम् ? सश्लोकं व्याख्यात।

**प्रश्नः २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत। (१०)**

(१) भगवता श्रीस्वामिनारायणेन भक्तिमातरं प्रति कथितानि सत्पुरुषाणां लक्षणानि लिखत।

(२) श्रीहरिणां भक्तिमातरं प्रति कथितं कार्यकारणरूपायाः मायायाः निवृत्तेस्साधनं परिचाययत।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ। (१०)**

(१) वर्णाश्रमधर्माणां वैशिष्ट्यं प्रतिपादयत।

(२) संन्यासाश्रमिणां को धर्मः ?

(३) धर्मनिष्ठस्तु पुरुषो हीनजातिकुलोऽपि यः ।

सोऽपि ब्रह्मादिभिः पूज्यः श्लाधनीयश्च जायते ॥

– इति पद्यं हेतुटीकानुगुणं सान्वयं व्याख्यात।

**प्रश्नः ४ निम्नलिखितेषु प्रश्नेष्वेक एक समाधेयः। (१०)**

(१) चतुवर्णानां साधारणधर्मानाजिवीकाश्च यथाग्रन्थं परिचाययत।

(२) सप्रकारकं धर्मं निरुपयत।

## तृतीयान्वितिः

**प्रश्नः ५ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम्।** **(१०)**

(१) स्वतन्त्रः स्वप्रकाशश्च सर्वकारणकारणम्।

ब्रह्मभूतैरप्युपास्यः कोटिसूर्यादिभास्वरः ॥ इति श्लोकं हेतुटीकानुसारं विवेचयत।

(२) असौ जीवेषु सर्वेषु प्रविश्य पुरुषात्मना।

यथाकर्म फलं दत्ते तेभ्यः साम्यमुपाश्रितः ॥ इति श्लोकं व्याख्यात।

(३) परमात्मस्वरूपज्ञानं यथाग्रन्थं निरुपयत।

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **(१०)**

(१) सप्रकारकज्ञानस्य लक्षणं स्पष्टयत।

(२) ब्रह्माण्डस्योत्पत्तिं यथाग्रन्थं लिखत।

**प्रश्नः ७ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः।** **(१०)**

(१) एषा श्रहरिगीता कस्मिन् ग्रन्थे दरिदृश्यते ?

(२) श्रीहरिगीतायाः द्वात्रिशत्तमे अध्याये किं निरूपितम् ?

(३) ''आकूतिचित्तिचापल्यरहिताः'' इति पदस्य कोऽर्थः ?

(४) सत्पुरुषाणां कानिचन चत्वारि लक्षणानि लिखत ?

(५) द्वात्रिंशत्तमे अध्याये भगवता श्रीहरिणा सत्पुरुषाणां कति लक्षणानि उक्तानि ?

(६) मायया विनिवृत्तः ? शुद्धः कृष्णसेवकः कुत्र गच्छति ?

(७) हीनजातिकुलोऽपि धर्मनिष्ठः पुरुषस्तु कै पूज्यः भवति ?

(८) चत्वारः वर्णाः के ?

(९) त्रैवर्णिकाणां पुरुषाणां कृते कैः द्विजत्वस्य प्राप्तिर्भवति ?

(१०) ''वार्णी'' इति पदस्य कोऽर्थः ?

(११) जीवात्मा कुत्र व्याप्य स्थितः ?

(१२) परमपुरुषः परमात्मा ''निर्गुणः'' इति किमर्थम् उच्यते ?

(१३) ज्ञानस्य लक्षणं किम् ?

(१४) परमात्मनः अनन्तशक्यः काः सन्ति ?

(१५) महाभूतानि कति ? कानि च तानि ?

--००--